पञ्च निक्षेपणानि भवन्ति । तद्यथा । फलकं तत्रष्टकं सुञ्चकलय उदकमञ्जिका शिक्यञ्चेति ॥ सप्त शीतीकरणानि भवन्ति प्रवातस्थापनमुदकप्रक्षेपणं यष्टिकाभ्रामणं व्यजनं वस्त्रोद्धरणं वालुकाप्रक्षेपणं शिक्यावलम्बनञ्चेति

**अम्बुकण** पु० ६त० । शीकरे जलविन्दौ स्त्रीत्येके । [च ।

**अम्बुकण्टक** पु० अम्बुनः कण्टकमिव । १कुम्भीरे, २शृङ्गाटके

**अम्बुकिरात** पु० अम्बुनि किरात इव हिंस्रः । कुम्भीरे ।

**अम्बुकीश** पु० अम्बुनि कीशः वानर इव । (शुशक) इति ख्याते शिशुमारे जलजन्तुभेदे ।

**अम्बुकूर्म्म** पु० अम्बुनि कूर्म्म इव । शिशुमारे (शुशक) हेम० ।

**अम्बुकेशर** पु० अम्बुजातः केशरोऽस्य । छोलङ्गवृक्षे रत्नमा० ।

**अम्बुचर** त्रि० अम्बुनि चरति चर—ट ७त० । जलचरे हंसादौ स्त्रियां ङीप् । [ख्याते शैवाले ।

**अम्बुचामर** न० अम्बुनि चामरमिव । (सेओयाला) इति

**अम्बुचारिन्** त्रि० अम्बुनि चरति चर—णिनि ७त० । जलचरे हंसादौ स्त्रियां ङीप् । "लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम्" मनुः ।

**अम्बुज** न० अम्बुनि जायते जन+ड । १पद्मे २सारसपक्षिणि । ३चन्द्रे ४कर्पूरे ५हिजल् इति ख्याते वृक्षे च पु० । ६शङ्खे पु०न० । ७वज्रे च । वज्रस्य जलदप्रभवत्वात्तथात्वम् । "चापं पाशाम्बुजसरसिजान्यङ्कुशं पुष्पवाणमिति"-ऽभुवनेश्वरीध्याने अम्बुजं पद्मं न तु शङ्खमिति तन्त्रसारोक्तेः अस्य शङ्खवाचकतापीति ज्ञायते ।

**अम्बुजन्मन्** न० अम्बुनो जन्मास्य जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्रीहिः । १पद्मे २सारसविहङ्गे ३शङ्खे पु०च ।

**अम्बुजासना** स्त्री अम्बुजमासनम् यस्याः । १लक्ष्म्याम् । २जलोद्भवे त्रि० । [याम् अच् । शैवाले (सेओयाला) ।

**अम्बुताल** पु० अम्बुनि तालयति प्रतितिष्ठति चु० तल—प्रतिष्ठा-

**अम्बुद** पु० अम्बु ददाति दा—क । १मेघे, "नवाम्बुदश्यामवपुर्न्यविक्षत" माघः "नवाम्बुदानीकमुहूर्त्तलाञ्छने" "स्तनमुतं वह्निमिवाद्भिरम्बुदः" इति च रघुः । २मुस्तके च ।

**अम्बुधर** पु० अम्बूनि धरति धृ—अच् । १मेघे "शरत्प्रमृष्टाम्बुधरोपरोधः" रघुः "अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः" कुमा० । २मुस्तके च ।

**अम्बुधि** पु० अम्बूनि धीयन्तेऽत्र धा—आधारे कि । १समुद्रे । "रत्नावलीरम्बुधिराबबन्ध" माघः २उदकाधारे घटादौ अम्बुधिर्घटः सि०कौ० । ३चतुःसंख्यान्विते च ।

**अम्बुधिप्रसवा** स्त्री अम्बुधिमिव प्रचुररसं प्रसूते प्र+सू—अच् । १घृतकुमार्य्याम् ।

**अम्बुनिधि** अम्बूनि निधीयन्तेऽस्मिन् अम्बु+नि+धा—आधारे कि । समुद्रे । "देवासुरैरमृतमम्बुनिधिर्ममन्थे" किरा० । "ये पक्षिणः प्रथममम्बुनिधिं गतास्ते" माघः ।

**अम्बुप** पु अम्बूनि पाति पिबति वा पा—रक्षणे—पाने वा क । १जलेश्वरे वरुणे "रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ" सि०शि० । २समुद्रे च ३जलपायिनि त्रि० ।

**अम्बुपत्रा** स्त्री अम्बूनि पत्रे यस्याः । उच्चटावृक्षे । अम्बुयुक्तं पत्रमस्याः गौरा० ङीष् । अम्बुपत्रीत्यप्यत्र ।

**अम्बुप्रसाद** पु० अम्बूनि प्रसादयति प्र+सद्—णिच्—अण् उप०स० । कतककवृक्षे (निर्मालि) ।

**अम्बुप्रसादन** न० अम्बूनि प्रसादयति प्र+सद्+णिच्—ल्यु ६त० । कतकतफले "फलं कतकवृक्षस्य यद्यम्बुप्रसादनम्" मनुः । जलप्रसादकारके त्रि० तानि ३३०पृष्ठे द्रष्टव्यानि ।

**अम्बुभृत्** पु० अम्बु बिभर्त्ति—भृ—क्विप् ६त० । १ मेघे २मुस्तके ३समुद्रे च । ४जलाधारमात्रे त्रि० ।

**अम्बुमत्** त्रि० अम्बूनि बाहुल्येन सन्त्यस्मिन् । १बह्वुदके देशादौ स्त्रियां ङीप् । सा च २नदीभेदे । "ततोऽम्बुमत्या धर्मज्ञ ! सुतीर्थञ्चाप्यनुत्तमम् भा०व०प० ।

**अम्बुमात्रज** पु० अम्बुमात्रे अल्पजले जायते जन—ड ७त० । शम्बूके, (शामुक) हेम० । [२मुस्तके च ।

**अम्बुमुच्** पु० अम्बूनि मुञ्चति मुच—क्विप् ६त० । १मेघे

**अम्बुर** पु० अम्ब—बा०उरन् । द्वाराधःकाष्ठे (गोवराट)हेम० ।

**अम्बुराशि** पु० अम्बूनां राशयो यत्र । समुद्रे । "नैतन्नभोमण्डलमम्बुराशिः" सा०द० 'अभूतपूर्व्वां रुचमम्बुराशेः' माघः "शापं दधज्ज्वलनमौर्व्वमिवाम्बुराशिः" रघुः ।

**अम्बुरुह्** न० अम्बुनि रोहति रुह—क्विप् ७त० १ पद्मे "विसृत्वरैरम्बुरुहां रजोभिः" माघः । २सारसविहगे च

**अम्बुरुह** पु० अम्बुनि—रोहति रुह—क ७त० । १ पद्मे । "द्रक्ष्यथाम्बुरुहं दिव्यं गोशृङ्गं नाम पर्वतम्" । "नदीं गोदावरीं चैव प्रसन्नाम्बुरुहां तत" इति च रामा० । अम्बुरुहं पद्ममिव पुष्पमस्याः अर्श०अच् । स्थलपद्मिन्यांस्त्री

**अम्बुरुहिणी** स्त्री अम्बुरुहाणां समूहः सन्निकृष्टदेशोवा इनि । १ पद्मसमूहे २ पद्मलतायाञ्च । [रसे च ।

**अम्बुरोहिन्** न०अम्बुनि रोहति रुह—णिनि । १पद्मे २सा-

**अम्बुवाची** स्त्री अम्बु तद्वर्षणं वाचयति सूचयति वच-णिच्—अण् उप०स०ङीप् । आर्द्राद्यपादस्यरविकालिकभूमौ "आर्द्राद्यादि